# Kailasatapashcharyayam Shiva Dhyanam

# કૈલાસતપશ્ચર્યાયાં શિવધ્યાનમ્

## Document Information

Text title : Kailasatapashcharyayam Shiva Dhyanam

File name : kailAsatapashcharyAyAMshivadhyAnam.itx

Category : shiva, shivarahasya, dhyAnam

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 44 - kailAsatapashcharyA | 10.2-42||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# કૈલાસતપશ્ચર્યાયાં શિવધ્યાનમ્

ત્રિણેત્રં નીલકણ્ઠઞ્ચ રાજચ્ચન્દ્રકલાધરં ॥ ૧૦॥

ગઙ્ગાતરઙ્ગવિલસત્પદ્મમાલાવિરાજિતમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં જટામુકુટમણ્ડિતમ્ ॥ ૧૧॥

નાગયજ્ઞોપવીતઞ્ચ ફણિભૂષાવિરાજિતમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં ત્રિપુણ્ડ્રપરિશોભિતમ્ ॥ ૧૨॥

ઉમયા સહિતન્દેવમઙ્ગરાગોજ્વલાઙ્ગકમ્ ।
મન્દારકુન્દદામોદ્યત્કન્ધરાલઙ્કૃતોરસમ્ ॥ ૧૩॥

કરિકૃત્તિપટીભાસ્વત્કટીતટવિરાજિતમ્ ।
ફણિમૌલિમહારત્નગણાઞ્ચિતસુકુણ્ડલમ્ ॥ ૧૪॥

હીરતારમહાસારપદ્મરાગસુકઙ્કણમ્ ।
આરક્તોરુમહાપટ્ટરાજત્પાદામ્બુજદ્વયમ્ ॥ ૧૫॥

મહાર્હવસનં દેવં પ્રસન્નાસ્યં સદાશિવમ્ ।
અષ્ટમીસોમસઙ્કાશનખરાજિવિરાજિતમ્ ॥ ૧૬॥

ઉત્ફુલ્લપુણ્ડરીકાક્ષવદનં સ્મરસુન્દરમ્ ।
દાડિમીબીજસઙ્કાશરદનાવલિભૂષિતમ્ ॥ ૧૭॥

પકબિમ્બફલોદારરદમચ્છદશોભિતમ્ ।
નીલેન્દીવરસઙ્કાશમાનીલારક્તલોચનમ્ ॥ ૧૮॥

પ્રસાદસુમુખં સાક્ષાજ્જગતાં સાક્ષિમીશ્વરમ્ ।
હરિન્મણિનિભાકારાં મમાઙ્કસ્થાઞ્ચ ત્વામપિ ॥ ૧૯॥

દધ્યૌનગેન્દ્રતિલકઃ પુષ્પધમ્મિલ્લશોભિતામ્ ।
ચામ્પેયકલિકોદ્ભામિદિવ્યનાસાવિરાજિતામ્ ॥ ૨૦॥

ઉદ્યત્કવિનિભાત્યચ્છમુક્તાફલસુનાસિકામ્ ।

સીમન્તરેખાસિન્દૂરરાજત્ભાલસુશોભિતામ્ ॥ ૨૧॥

મણિધ્વજમહાચાપસન્નિભભ્રૂયુગોજ્વલામ્ ।
કસ્તૂરીતિલકોલ્લાસિભાલભાગમનોહરામ્ ॥ ૨૨॥

ઉદ્યદુત્ફુલ્લનીલાચ્છદલરક્તદૃશા યુતામ્ ।
હીરસારકણાત્યચ્છદન્તપઙ્ક્તિવિરાજિતામ્ ॥ ૨૩॥

દાડિમીપુષ્પસઙ્કાશાધરધારારસાં શિવામ્ ।
તામ્બૂલાપૂરિતમુખીં પ્રસન્નાં સસ્મિતામુમામ્ ॥ ૨૪॥

તપનોડુપવિભ્રાજત્કર્ણતાટઙ્કમણ્ડિતામ્ ।
કર્ણપત્રમણિવ્રાતભાસ્વન્મણ્ડિતગણ્ડકામ્ ॥ ૨૫॥

કપોલપાલિકાદર્શધગદ્ધગિતદિક્તટામ્ ।
ચમ્પકોદ્દામકહ્લારચકુલાશોકનાગકૈઃ ॥ ૨૬॥

મરુદ્મનકોદ્ભાસિમલ્લીમુલ્લીસરાવૃતામ્ ।
વેણુમણ્ડલરત્નાઙ્કચન્દ્રખણ્ડશિખણ્ડકામ્ ॥ ૨૭॥

ગ્રૈવેયલગ્નમણિજસરાવલિલસદ્ગલામ્ ।
ચિન્તાકલ્લોલમુક્તાચ્છરાજત્પદકસન્તતિમ્ ॥ ૨૮॥

નવરત્નમણિભ્રાજદ્ધીરહારોરુવક્ષજામ્ ।
સુરત્નપુષ્પગુચ્છાચ્છધારિતાયતવેણિકામ્ ॥ ૨૯॥

પરાકેતોત્થિતાપારપીતોદ્યત્કેતકૈર્યુતામ્ ।
કેતકીગન્ધસુભગશીતવાતાયિતાઙ્ગકામ્ ॥ ૩૦॥

ત્રિભઙ્ગીસુભગાકારતલોદરવિરાજિતામ્ ।
તારાસ્વચ્છમહાવૃત્તમુક્તાહારવિરાજિતામ્ ॥ ૩૧॥

સ્ફુરત્પદકરત્નાચ્છકાન્તિકાઞ્ચિતદિક્તટામ્ ।
રત્નહારમણીભાસ્વન્નવરત્નાલિશોભિતામ્ ॥ ૩૨॥

ઉન્મત્તકરટીકુમ્ભસુવર્ણાભકુચોજ્વલામ્ ।
પાટીરસારકસ્તૂરીચન્દ્રચન્દનચર્ચિતામ્ ॥ ૩૩॥

પટવાસાગરુભવતૈલગન્ધૈકભાસુરામ્ ।
નિચોલરત્નપર્યન્તમુક્તાજાલલસત્કુચામ્ ॥ ૩૪॥

ત્રિવલીલલિતોદારસુનાભ્યુદરશોભિતામ્ ।
મૃણાલનાલસુભગરત્નબાહુદ્વયાઞ્ચિતામ્ ॥ ૩૫॥

નાનાદલ(નાનારત્ન)ચિતાનેકબાહુભૂષણભૂષિતામ્ ।
નાગબન્ધફણારત્નલોલિતાપારમૌક્તિકામ્ ॥ ૩૬॥

વઙ્કિકાફલ્લિકાભ્રાજદ્દ્રવપઙ્કજશોભિતામ્ ।
મણિમાણિક્યખચિતહસ્તકઙ્કણશોભિતામ્ ॥ ૩૭॥

રત્નાઙ્ગુલીયવિલસન્નખપઙ્ક્તિવિરાજિતામ્ ।
મહાહીરાચ્છફલકાઙ્ગુષ્ઠવેષ્ટનવેષ્ટિતામ્ ॥ ૩૮॥

તદઙ્ગુષ્ઠશિરોત્તુઙ્ગચલનાત્કાન્તદિક્તટામ્ ।
સુરત્નકાઞ્ચીખચિતનવરત્નપ્રભોત્કટામ્ ॥ ૩૯॥

તદધસ્તાલ્લલત્ક્ષુદ્રઘણ્ટારણિતસુન્દરામ્ ।
દાડિમીફુલ્લકુસુમકાન્તિરઞ્જિતચેલિકામ્ ॥ ૪૦॥

રત્નપર્યન્તસારાચ્છધારાપ્લુષ્ટકુ(ક)ચોત્તરામ્ ।
મણિમઞ્જીરશિઞ્જાનલગ્નપાદામ્બુજદ્વયામ્ ॥ ૪૧॥

પદપાથોજકાઙ્ગુષ્ઠવેષ્ટનાગ્રોત્થગુચ્છકામ્ ।
પાદાઙ્ગુલીયભૂષાભિરાલક્તાઙ્કિતપદ્વયામ્ ॥ ૪૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસતપશ્ચર્યાયાં શિવધ્યાનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૪૪ - કૈલાસતપશ્ચર્યા । ૧૦.૨-૪૨॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 44 - kailAsatapashcharyA . 10.2-42..

Notes:
Īśvara ઈશ્વર narrates to Devī દેવી; the Śivadhyāna shivadhyAna performed by Kailāsa કૈલાસ during his tapaścaryā તપશ્ચર્યા.

Encoded and proofread by Ruma Dewan

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*